# Shivakrita Shri Ganesha Stuti

# શિવકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shivakrita Shri Ganesha Stuti

File name : gaNeshastutiHshivakRRitA.itx

Category : ganesha, gaNeshapurANa, stuti

Location : doc_ganesha

Proofread by : Preeti Bhandare

Description/comments : shrIgaNeshapurANaM krIDA (uttara)khaNDaH | adhyAyaH 48 | 2.48 5-19||

Latest update : April 20, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 20, 2024

*sanskritdocuments.org*

# શિવકૃતા શ્રીગણેશસ્તુતિઃ

શિવ ઉવાચ ।
ત્વમેવ વિશ્વેશ્વર વિશ્વરૂપ ! વિશ્વં સૃજસ્યત્સિ હિ પાસિ દેવ ! ।
શુભાશુભં કર્મ નિરિક્ષ્ય તસ્ય દદાસિ ભોગં વિવિધં ગણેશ ! ॥ ૫॥

બ્રહ્મેઙ્ગિતાત્તે જગતીં વિધત્તે તદ્રક્ષણં ચૈવ હરિસ્થતાऽહમ્ ।
(બ્રહ્માપિ સૃષ્ટિ કુરુતેઙ્ગિતાત્તે)
સંહારકારીહ ચરાચરસ્ય વિભાગકૃત્યં હિ ગુણત્રયસ્ય ॥ ૬॥

તવ પ્રસાદાદ્ધરિરબ્જજોऽપિ શિવશ્ચ શક્તો નિજકર્મસિદ્ધ્યૈ ।
ત્વયા વિના વેદવિધિર્વૃથા સ્યાત્ ત્વદીયશક્ત્યા સુરશત્રુનાશઃ ॥ ૭॥

અનન્તશક્તિઃ પ્રકૃતિઃ પુરા ત્વાં સમર્ચ્ય દુષ્ટં મહિષં જઘાન ।
યચ્છ્વાસનિર્ધૂતનગપ્રપાતભીતં જગત્કૃત્સ્નમિદં રરક્ષ ॥ ૮॥

ત્વમપ્રમેયોऽખિલલોકસાક્ષી ત્વમવ્યયઃ કારણકારણં ચ ।
વેદા વિકુણ્ઠાસ્ત્વયિ સર્વ એવ શેષો ધરાભૃત્તવ ભક્તિતો હિ ॥ ૯॥

ત્વામેવ નત્વા પરિપૂજયન્તઃ સન્તો યજન્તે મનસા સ્મરન્તઃ ।
ત્વય્યેવ ભક્તિં પરિકલ્પયન્તો મુક્તિં ભજન્તે પરિવૃત્તિહીનાઃ ॥ ૧૦॥

અનેકરૂપાઙ્ઘ્રિવિલોચનસ્ત્વમનેકશીર્ષશ્રુતિબાહુજિહ્વઃ ।
અનન્તવિજ્ઞાનઘનો હ્યનેકબ્રહ્માણ્ડહેતુઃ પરમપ્રકાશઃ ॥ ૧૧॥

તવ પ્રસાદાદવિમુક્તમેતદ્ દૃષ્ટં ચિરાદ્ યત્નવતાऽખિલેશ ! ।
મુનિરુવાચ ।
એવં સ્તુત્વા ચ સમ્પૂજ્ય પ્રાર્થયામાસ શઙ્કરઃ ॥ ૧૨॥

ગતં વિરહદુઃખ મે પ્રાપ્ય વારાણસીં પુરીમ્ ।
ઇદાનીં સર્વદા રક્ષ મદ્ભક્તાઁશ્ચ પુરીમિમામ્ ॥ ૧૩॥

વિના પ્રસાદં તે ન સ્યાત્ કાશીવાસઃ કદાચન ।

દણ્ડપાણેર્ભૈરવસ્ય તેઽપિ યસ્ય કૃપા ભવેત્ ॥ ૧૪॥

તારકં બ્રહ્મ તસ્યાન્તે દિશામિ ચ ન ચાન્યથા ।
માઘમાસી ચતુર્થ્યાં યો ભૌમવારે વિધૂદયે ॥ ૧૫॥

અપૂપૈર્મોદકૈરન્યૈરુપચારૈઃ પ્રપૂજયેત્ ।
સંહૃત્ય તસ્ય સદ્ધુષ્ટે સ્તોત્રપાઠેન યો નુયાત્ ॥ ૧૬॥

તસ્યાપિ સકલાન્ કામાન્ યચ્છ લક્ષ્મીમનેકધા ।
ય ઇદં પ્રાતરુત્થાય ત્રિસન્ધ્યં વાપિ ભક્તિતઃ ॥ ૧૭॥

પઠેત્ સ્તોત્રં સકૃદ્ વાપિ ભુક્તિર્મુક્તિશ્ચ તસ્ય ચ ।
અન્વેષયિત્વા સર્વાર્થાન્ વિદધાસિ નૃણામિહ ॥ ૧૮॥

અતો ઢુણ્ઢિરિતિ ખ્યાતસ્ત્રિલોક્યાં ત્વં ભવિષ્યસિ ! ।
ઢુણ્ઢિરિત્યેવ તં નામ મુક્તિદં પાપનાશનમ્ ॥ ૧૯॥

સ્મરણાત્ સર્વકાર્યાણાં સિદ્ધિદં ચભવિષ્યતિ ।

ઇતિ શિવકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીગણેશપુરાણં ક્રીડા (ઉત્તર)ખણ્ડઃ । અધ્યાયઃ ૪૮ । ૨.૪૮ ૫-૧૯॥

- .. shrIgaNeshapurANaM krIDA (uttara)khaNDaH . adhyAyaH 48 . 2.48 5-19..

Proofread by Preeti Bhandare

*Shivakrita Shri Ganesha Stuti*

pdf was typeset on April 20, 2024

Please send corrections to *sanskrit@cheerful.com*